अस्वामिकं ततः प्राह दमः शत्रुं दमस्तथा ।
एषाहि दुष्टपितरं घातयित्वा तपस्विनं ॥
अशस्त्रञ्च ततः सैन्यं क्षत्रियोऽसि निवर्त्ततां ।
ततो विवक्षुः स दमो योधयामास सानुजं ॥
स पुत्रैः सह संवाधं बान्धवैर्युयुधे रथी ।
ततः शरासनान्मुक्तवाणैर्व्याप्तं ततो दिशः ॥
दमञ्च सरथञ्चाशु शरजालैरपूरयत् ।
ततः पितृवधोत्थेन कोपेन स दमस्तथा ॥
चिच्छेदास्तांश्छरांस्तेषां विव्याधान्यैश्च तानपि ।
एकैकेन वाणेन सप्त पुत्रांस्तथा द्विज ॥
सम्बन्धिबान्धवान्मित्रान् निनाय यमसादनं ।
वपुष्मान् स रथी क्रोधान्निहतात्मजबान्धवः ॥
युयुधे च स तेनाजौ स रथी विबुधोपमः ।
चिच्छेद तस्य तान्वाणान् स दमः प्रत्युवाच ह ॥
युयुधाते च संरब्धौ परस्परजयैषिणौ ।
परस्परशराघातविच्छिन्नधनुषौ त्वरन् ॥
गृहीतखड्गमुद्यम्य चिक्रीडति वपुष्मति ।
दमः क्षणं नृपं ज्ञात्वा पितरञ्च स्थितं वने ॥
केशेष्वाकृष्य चाक्रम्य निपात्य धरणीतले ।
शिरोधरायां पादेन भुजमुद्यम्य चाब्रवीत् ॥
पश्यन्तु देवताः सर्व्वे मानुषाः पन्नगाः खगाः ।
पाट्यमानं च हृदयं क्षत्रबन्धोर्वपुष्मतः ॥
एवमुक्त्वा च स दमो हृदयञ्च व्यदारयत् ।
स्वात्तकामश्च ससुरैः क्षतजेन निवारितः ॥
ततश्चकार तातस्य रक्तेनैवोदकक्रियां ।
त्वानृण्यं प्राप्य स पितुः पुनः प्रायात् स्वमन्दिरं ॥
वपुष्मतश्च मांसेन पिण्डदानं चकार ह ।
ब्राह्मणान् भोजयामास रक्षःकुलसमुद्भवान् ॥

